॥ श्री सुब्रह्मण्य सहस्रनाम स्तोत्रम् ॥

Śrī Subrahmaṇya Sahasranāma Stotram

ऋषय ऊचुः –

ṛṣaya ūcuḥ –

सर्वशास्त्रार्थतत्त्वज्ञ सर्वलोकोपकारक ।

sarvaśāstrārthatattvajña sarvalokopakāraka ।

वयं चातिथयः प्राप्ता आतिथेयोऽसि सुव्रत ॥ १ ॥

vayaṁ cātithayaḥ prāptā ātitheyo'si suvrata ।। 1।।

ज्ञानदानेन संसारसागरात्तारयस्व नः ।

jñānadānena saṁsārasāgarāttārayasva naḥ ।

कलौ कलुषचित्ता ये नराः पापरताः सदा ॥ २ ॥

kalau kaluṣacittā ye narāḥ pāparatāḥ sadā ।। 2।।

केन स्तोत्रेण मुच्यन्ते सर्वपातकबन्धनैः ।

kena stotreṇa mucyante sarvapātakabandhanaiḥ ।

इष्टसिद्धिकरं पुण्यं दुःखदारिद्र्यनाशनम् ॥ ३ ॥

iṣṭasiddhikaraṁ puṇyaṁ duḥkhadāridryanāśanam ।। 3।।

सर्वरोगहरं स्तोत्रं सूत नो वक्तुमर्हसि ।

sarvarogaharaṁ stotraṁ sūta no vaktumarhasi ।

श्रीसूत उवाच –

śrīsūta uvāca –

शृणुध्वमृषयः सर्वे नैमिषारण्यवासिनः ॥ ४ ॥

śṛṇudhvamṛṣayaḥ sarve naimiṣāraṇyavāsinaḥ ।। 4।।

तत्त्वज्ञानतपोनिष्ठाः सर्वशास्त्रविशारदाः ।

tattvajñānataponiṣṭhāḥ sarvaśāstraviśāradāḥ ।

स्वयंभुवा पुरा प्रोक्तं नारदाय महात्मने ॥ ५ ॥

svayambhuvā purā proktaṁ nāradāya mahātmane ।। 5।।

तदहं संप्रवक्ष्यामि श्रोतुं कौतूहलं यदि ।

tadahaṁ sampravakṣyāmi śrotuṁ kautūhalaṁ yadi ।

ऋषय ऊचुः –

ṛṣaya ūcuḥ –

किमाह भगवान्ब्रह्मा नारदाय महात्मने ॥ ६ ॥

kimāha bhagavānbrahmā nāradāya mahātmane ।। 6।।

सूतपुत्र महाभाग वक्तुमर्हसि सांप्रतम् ।

sūtaputra mahābhāga vaktumarhasi sāmpratam ।

श्रीसूत उवाच –

śrīsūta uvāca –

दिव्यसिंहासनासीनं सर्वदेवैरभिष्टुतम् ॥ ७ ॥

divyasiṁhāsanāsīnaṁ sarvadevairabhiṣṭutam ।। 7।।

साष्टाङ्गप्रणिपत्यैनं ब्रह्माणं भुवनेश्वरम् ।

sāṣṭāṅgapraṇipatyainaṁ brahmāṇaṁ bhuvaneśvaram ।

नारदः परिपप्रच्छ कृताञ्जलिरुपस्थितः ॥ ८ ॥

nāradaḥ paripapraccha kṛtāñjalirupasthitaḥ ।। 8।।

नारद उवाच –

nārada uvāca -

लोकनाथ सुरश्रेष्ठ सर्वज्ञकरुणाकर ।

lokanātha suraśreṣṭha sarvajñakaruṇākara ।

षण्मुखस्य परं स्तोत्रं पावनं पापनाशनम् ॥ ९ ॥

ṣaṇmukhasya paraṁ stotraṁ pāvanaṁ pāpanāśanam ।। 9।।

धातस्त्वं पुत्रवात्सल्यात्तद्वद प्रणताय मे ।

dhātastvaṁ putravātsalyāttadvada praṇatāya me ।

उपदिश्य तु मां देव रक्ष रक्ष कृपानिधे ॥ १० ॥

upadiśya tu māṁ deva rakṣa rakṣa kṛpānidhe ।। 10।।

ब्रह्मा उवाच –

brahmā uvāca –

शृणु वक्ष्यामि देवर्षे स्तवराजमिमं परम् ।

śṛṇu vakṣyāmi devarṣe stavarājamimaṁ param ।

मातृकामालिकायुक्तं ज्ञानमोक्षसुखप्रदम् ॥ ११ ॥

mātṛkāmālikāyuktaṁ jñānamokṣasukhapradam ।। 11।।

सहस्राणि च नामानि षण्मुखस्य महात्मनः ।

sahasrāṇi ca nāmāni ṣaṇmukhasya mahātmanaḥ ।

यानि नामानि दिव्यानि दुःखरोगहराणि च ॥ १२ ॥

yāni nāmāni divyāni duḥkharogaharāṇi ca ।। 12।।

तानि नामानि वक्ष्यामि कृपया त्वयि नारद ।

tāni nāmāni vakṣyāmi kṛpayā tvayi nārada ।

जपमात्रेण सिध्यन्ति मनसा चिन्तितान्यपि ॥ १३ ॥

japamātreṇa sidhyanti manasā cintitānyapi ।। 13।।

इहामुत्रं परं भोगं लभते नात्र संशयः ।

ihāmutraṁ paraṁ bhogaṁ labhate nātra saṁśayaḥ ।

इदं स्तोत्रं परं पुण्यं कोटियज्ञफलप्रदम् ।

idaṁ stotraṁ paraṁ puṇyaṁ koṭiyajñaphalapradam ।

सन्देहो नात्र कर्तव्यः शृणु मे निश्चितं वचः ॥ १४ ॥

sandeho nātra kartavyaḥ śṛṇu me niścitaṁ vacaḥ ।। 14।।

❀❀❀

ॐ अस्य श्रीसुब्रह्मण्यसहस्रनामस्तोत्रमहामन्त्रस्य

om asya śrīsubrahmaṇyasahasranāmastotramahāmantrasya

ब्रह्मा ऋषिः ।

brahmā ṛṣiḥ ।

अनुष्टुप्छन्दः ।

anuṣṭupchandaḥ ।

सुब्रह्मण्यो देवता ।

subrahmaṇyo devatā ।

शरजन्माक्षय इति बीजम् ।

śarajanmākṣaya iti bījam ।

शक्तिधरोऽक्षय इति शक्तिः ।

śaktidharo'kṣaya iti śaktiḥ ।

कार्तिकेय इति कीलकम् ।

kārtikeya iti kīlakam ।

क्रौचंभेदीत्यर्गलम् ।

kraucambhedītyargalam ।

शिखिवाहन इति कवचम् ।

śikhivāhana iti kavacam ।

षण्मुख इति ध्यानम् ।

ṣaṇmukha iti dhyānam ।

श्रीसुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे विनियोगः ।

śrīsubrahmaṇyaprasādasiddhyarthe jape viniyogaḥ ।

❀❀❀

। ध्यानम् ।

। dhyānam ।

ध्यायेत्षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितम् ।

dhyāyetṣaṇmukhamindukoṭisadṛśaṁ ratnaprabhāśobhitam ।

बालार्कद्युतिषट्किरीटविलसत्केयूरहारान्वितम् ॥ १ ॥

bālārkadyutiṣaṭkirīṭavilasatkeyūrahārānvitam ।। 1।।

कर्णालम्बितकुण्डलप्रविलसद्गण्डस्थलाशोभितम् ।

karṇālambitakuṇḍalapravilasadgaṇḍasthalāśobhitam ।

काञ्चीकङ्कणकिंकिणीरवयुतं शृङ्गारसारोदयम् ॥ २ ॥

kāñcīkaṅkaṇakiṅkiṇīravayutaṁ śṛṅgārasārodayam ।। 2।।

ध्यायेदीप्सितसिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहम् ।

dhyāyedīpsitasiddhidaṁ śivasutaṁ śrīdvādaśākṣaṁ guham ।

खेटं कुक्कुटमंकुशं च वरदं पाशं धनुश्चक्रकम् ॥ ३ ॥

kheṭaṁ kukkuṭamaṅkuśaṁ ca varadaṁ pāśaṁ dhanuścakrakam ।। 3।।

वज्रं शक्तिमसिं च शूलमभयं दोर्भिर्धृतं षण्मुखम् ।

vajraṁ śaktimasiṁ ca śūlamabhayaṁ dorbhirdhṛtaṁ ṣaṇmukham ।

देवं चित्रमयूरवाहनगतं चित्राम्बरालंकृतम् ॥ ४ ॥

devaṁ citramayūravāhanagataṁ citrāmbarālaṅkṛtam ।। 4।।

॥ सुब्रह्मण्य सहस्रनाम स्तोत्रम् ॥

| | subrahmaṇya sahasranāma stotram | |

अचिन्त्यशक्तिरनघस्त्वक्षोभ्यस्त्वपराजितः ।

acintyaśaktiranaghastvakṣobhyastvaparājitaḥ |

अनाथवत्सलोऽमोघस्त्वशोकोऽप्यजरोऽभयः ॥ १ ॥

anāthavatsalo'moghastvaśoko'pyajaro'bhayaḥ | | 1 | |

अत्युदारो ह्यघहरस्त्वग्रगण्योऽद्रिजासुतः ।

atyudāro hyaghaharastvagraganyo'drijāsutaḥ |

अनन्तमहिमाऽपारोऽनन्तसौख्यप्रदोऽव्ययः ॥ २ ॥

anantamahimā'pāro'nantasaukhyaprado'vyayaḥ | | 2 | |

अनन्तमोक्षदोऽनादिरप्रमेयोऽक्षरोऽच्युतः ।

anantamokṣado'nādiraprameyo'kṣaro'cyutaḥ |

अकल्मषोऽभिरामोऽग्रधुर्यश्चामितविक्रमः ॥ ३ ॥

akalmaṣo'bhirāmo'gradhuryaścāmitavikramaḥ | | 3 | |

अनाथनाथो ह्यमलो ह्यप्रमत्तोऽमरप्रभुः ।

anāthanātho hyamalo hyapramatto'maraprabhuḥ |

अरिन्दमोऽखिलाधारस्त्वणिमादिगुणोऽग्रणीः ॥ ४ ॥

arindamo'khilādhārastvaṇimādiguṇo'graṇīḥ | | 4 | |

अचञ्चलोऽमरस्तुत्यो ह्यकलङ्कोऽमिताशनः ।

acañcalo'marastutyo hyakalaṅko'mitāśanaḥ ।

अग्निभूरनवद्याङ्गो ह्यद्भुतोऽभीष्टदायकः ॥ ५ ॥

agnibhūranavadyāṅgo hyadbhuto'bhīṣṭadāyakaḥ ।। 5।।

अतीन्द्रियोऽप्रमेयात्मा ह्यदृश्योऽव्यक्तलक्षणः ।

atīndriyo'prameyātmā hyadṛśyo'vyaktalakṣaṇaḥ ।

आपद्विनाशकस्त्वार्य आढ्य आगमसंस्तुतः ॥ ६ ॥

āpadvināśakastvārya āḍhya āgamasaṁstutaḥ ।। 6।।

आर्तसंरक्षणस्त्वाद्य आनन्दस्त्वार्यसेवितः ।

ārtasaṁrakṣaṇastvādya ānandastvāryasevitaḥ ।

आश्रितेष्टार्थवरद आनन्द्यार्तफलप्रदः ॥ ७ ॥

āśriteṣṭārthavarada ānandyārtaphalapradaḥ ।। 7।।

आश्चर्यरूप आनन्द आपन्नार्तिविनाशनः ।

āścaryarūpa ānanda āpannārtivināśanaḥ ।

इभवक्त्रानुजस्त्विष्ट इभासुरहरात्मजः ॥ ८ ॥

ibhavaktrānujastviṣṭa ibhāsuraharātmajaḥ ।। 8।।

इतिहासश्रुतिस्तुत्य इन्द्रभोगफलप्रदः ।

itihāsaśrutistutya indrabhogaphalapradaḥ ।

इष्टापूर्तफलप्राप्तिरिष्टेष्टवरदायकः ॥ ९ ॥

iṣṭāpūrtaphalaprāptiriṣṭeṣṭavaradāyakaḥ ।। 9।।

इहामुत्रेष्टफलद इष्टदस्त्विन्द्रवन्दितः ।

ihāmutreṣṭaphalada iṣṭadastvindravanditaḥ ।

ईडनीयस्त्वीशपुत्र ईप्सितार्थप्रदायकः ॥ १० ॥

īḍanīyastvīśaputra īpsitārthapradāyakaḥ ।। 10।।

ईतिभीतिहरश्चेड्य ईषणात्रयवर्जितः ।

ītibhītiharaśceḍya īṣaṇātrayavarjitaḥ ।

उदारकीर्तिरुद्योगी चोत्कृष्टोरुपराक्रमः ॥ ११ ॥

udārakīrtirudyogī cotkṛṣṭoruparākramaḥ ।। 11।।

उत्कृष्टशक्तिरुत्साह उदारश्चोत्सवप्रियः ।

utkṛṣṭaśaktirutsāha udāraścotsavapriyaḥ ।

उज्जृम्भ उद्भवश्चोग्र उदग्रश्चोग्रलोचनः ॥ १२ ॥

ujjṛmbha udbhavaścogra udagraścogralocanaḥ ।। 12।।

उन्मत्त उग्रशमन उद्वेगघ्नोरगेश्वरः ।

unmatta ugraśamana udvegaghnorageśvaraḥ ।

उरुप्रभावश्चोदीर्ण उमापुत्र उदारधीः ॥ १३ ॥

uruprabhāvaścodīrṇa umāputra udāradhīḥ ।। 13।।

ऊर्ध्वरेतःसुतस्तूर्ध्वगतिदस्तूर्जपालकः ।

ūrdhvaretaḥsutastūrdhvagatidastūrjapālakaḥ ।

ऊर्जितस्तूर्ध्वगस्तूर्ध्व ऊर्ध्वलोकैकनायकः ॥ १४ ॥

ūrjitastūrdhvagastūrdhva ūrdhvalokaikanāyakaḥ ।। 14।।

ऊर्जिवानूर्जितोदार ऊर्जितोर्जितशासनः ।

ūrjivānūrjitodāra ūrjitorjitaśāsanaḥ ।

ऋषिदेवगणस्तुत्य ऋणत्रयविमोचनः ॥ १५ ॥

ṛṣidevagaṇastutya ṛṇatrayavimocanaḥ ।। 15।।

ऋजुरूपो ह्यृजुकर ऋजुमार्गप्रदर्शनः ।

ṛjurūpo hyṛjukara ṛjumārgapradarśanaḥ ।

ऋतंभरो ह्यृजुप्रीत ऋषभस्त्वृद्धिदस्त्वृतः ॥ १६ ॥

ṛtambharo hyṛjuprīta ṛṣabhastvṛddhidastvṛtaḥ ।। 16।।

लुलितोद्धारको लूतभवपाशप्रभञ्जनः ।

lulitoddhārako lūtabhavapāśaprabhañjanaḥ ।

एणाङ्कधरसत्पुत्र एक एनोविनाशनः ॥ १७ ॥

eṇāṅkadharasatputra eka enovināśanaḥ ।। 17।।

ऐश्वर्यदश्चैन्द्रभोगी चैतिह्यश्चैन्द्रवन्दितः ।

aiśvaryadaścaindrabhogī caitihyaścaindravanditaḥ ।

ओजस्वी चौषधिस्थानमोजोदश्चौदनप्रदः ॥ १८ ॥

ojasvī cauṣadhisthānamojodaścaudanapradaḥ ।। 18।।

औदार्यशील औमेय औग्र औन्नत्यदायकः ।

audāryaśīla aumeya augra aunnatyadāyakaḥ ।

औदार्य औषधकर औषधं चौषधाकरः ॥ १९ ॥

audārya auṣadhakara auṣadhaṁ cauṣadhākaraḥ ।। 19।।

अंशुमाल्यंशुमालीड्य अम्बिकातनयोऽन्नदः ।

aṁśumālyaṁśumālīḍya ambikātanayo'nnadaḥ ।

अन्धकारिसुतोऽन्धत्वहारी चाम्बुजलोचनः ॥ २० ॥

andhakārisuto'ndhatvahārī cāmbujalocanaḥ ।। 20।।

अस्तमायोऽमराधीशो ह्यस्पष्टोऽस्तोकपुण्यदः ।

astamāyo'marādhīśo hyaspaṣṭo'stokapuṇyadaḥ ।

अस्तामित्रोऽस्तरूपश्चास्खलत्सुगतिदायकः ॥ २१ ॥

astāmitro'starūpaścāskhalatsugatidāyakaḥ ।। 21।।

कार्तिकेयः कामरूपः कुमारः क्रौञ्चदारणः ।

kārtikeyaḥ kāmarūpaḥ kumāraḥ krauñcadāraṇaḥ ।

कामदः कारणं काम्यः कमनीयः कृपाकरः ॥ २२ ॥

kāmadaḥ kāraṇaṁ kāmyaḥ kamanīyaḥ kṛpākaraḥ ।। 22।।

काञ्चनाभः कान्तियुक्तः कामी कामप्रदः कविः ।

kāñcanābhaḥ kāntiyuktaḥ kāmī kāmapradaḥ kaviḥ ।

कीर्तिकृत्कुक्कुटधरः कूटस्थः कुवलेक्षणः ॥ २३ ॥

kīrtikṛtkukkuṭadharaḥ kūṭasthaḥ kuvalekṣaṇaḥ ।। 23।।

कुङ्कुमाङ्गः क्लमहरः कुशलः कुक्कुटध्वजः ।

kuṅkumāṅgaḥ klamaharaḥ kuśalaḥ kukkuṭadhvajaḥ ।

कुशानुसंभवः क्रूरः क्रूरघ्नः कलितापहृत् ॥ २४ ॥

kuśānusambhavaḥ krūraḥ krūraghnaḥ kalitāpahṛt ।। 24।।

कामरूपः कल्पतरुः कान्तः कामितदायकः ।

kāmarūpaḥ kalpataruḥ kāntaḥ kāmitadāyakaḥ ।

कल्याणकृत्क्लेशनाशः कृपालुः करुणाकरः ॥ २५ ॥

kalyāṇakṛtkleśanāśaḥ kṛpāluḥ karuṇākaraḥ ।। 25।।

कलुषघ्नः क्रियाशक्तिः कठोरः कवची कृती ।

kaluṣaghnaḥ kriyāśaktiḥ kaṭhoraḥ kavacī kṛtī ।

कोमलाङ्गः कुशप्रीतः कुत्सितघ्नः कलाधरः ॥ २६ ॥

komalāṅgaḥ kuśaprītaḥ kutsitaghnaḥ kalādharaḥ ।। 26।।

ख्यातः खेटधरः खड्गी खट्वाङ्गी खलनिग्रहः ।

khyātaḥ kheṭadharaḥ khaḍgī khaṭvāṅgī khalanigrahaḥ ।

ख्यातिप्रदः खेचरेशः ख्यातेहः खेचरस्तुतः ॥ २७ ॥

khyātipradaḥ khecareśaḥ khyātehaḥ khecarastutaḥ ।। 27।।

खरतापहरः स्वस्थः खेचरः खेचराश्रयः ।

kharatāpaharaḥ svasthaḥ khecaraḥ khecarāśrayaḥ ।

खण्डेन्दुमौलितनयः खेलः खेचरपालकः ॥ २८ ॥

khaṇḍendumaulitanayaḥ khelaḥ khecarapālakaḥ ।। 28।।

खस्थलः खण्डितार्कश्च खेचरीजनपूजितः ।

khasthalaḥ khaṇḍitārkaśca khecarījanapūjitaḥ ।

गाङ्गेयो गिरिजापुत्रो गणनाथानुजो गुहः ॥ २९ ॥

gāṅgeyo girijāputro gaṇanāthānujo guhaḥ ।। 29।।

गोप्ता गीर्वाणसंसेव्यो गुणातीतो गुहाश्रयः ।

goptā gīrvāṇasaṁsevyo guṇātīto guhāśrayaḥ ।

गतिप्रदो गुणनिधिः गम्भीरो गिरिजात्मजः ॥ ३० ॥

gatiprado guṇanidhiḥ gambhīro girijātmajaḥ ।। 30।।

गूढरूपो गदहरो गुणाधीशो गुणाग्रणीः ।

gūḍharūpo gadaharo guṇādhīśo guṇāgraṇīḥ ।

गोधरो गहनो गुप्तो गर्वघ्नो गुणवर्धनः ॥ ३१ ॥

godharo gahano gupto garvaghno guṇavardhanaḥ ।। 31।।

गुह्यो गुणज्ञो गीतिज्ञो गतातङ्को गुणाश्रयः ।

guhyo guṇajño gītijño gatātaṅko guṇāśrayaḥ ।

गद्यपद्यप्रियो गुण्यो गोस्तुतो गगनेचरः ॥ ३२ ॥

gadyapadyapriyo guṇyo gostuto gaganecaraḥ ।। 32।।

गणनीयचरित्रश्च गतक्लेशो गुणार्णवः ।

gaṇanīyacaritraśca gatakleśo guṇārṇavaḥ ।

घूर्णिताक्षो घृणिनिधिः घनगम्भीरघोषणः ॥ ३३ ॥

ghūrṇitākṣo ghṛṇinidhiḥ ghanagambhīraghoṣaṇaḥ ।। 33।।

घण्टानादप्रियो घोषो घोराघौघविनाशनः ।

ghaṇṭānādapriyo ghoṣo ghorāghaughavināśanaḥ ।

घनानन्दो घर्महन्ता घृणावान् घृष्टिपातकः ॥ ३४ ॥

ghanānando gharmahantā ghṛṇāvān ghṛṣṭipātakaḥ ।। 34।।

घृणी घृणाकरो घोरो घोरदैत्यप्रहारकः ।

ghṛṇī ghṛṇākaro ghoro ghoradaityaprahārakaḥ ।

घटितैश्वर्यसंदोहो घनार्थो घनसंक्रमः ॥ ३५ ॥

ghaṭitaiśvaryasandoho ghanārtho ghanasaṅkramaḥ ।। 35।।

चित्रकृच्चित्रवर्णश्च चञ्चलश्चपलद्युतिः ।

citrakṛccitravarṇaśca cañcalaścapaladyutiḥ ।

चिन्मयश्चित्स्वरूपश्च चिरानन्दश्चिरंतनः ॥ ३६ ॥

cinmayaścitsvarūpaśca cirānandaścirantanaḥ ।। 36।।

चित्रकेलिश्चित्रतरश्चिन्तनीयश्चमत्कृतिः ।

citrakeliścitrataraścintanīyaścamatkṛtiḥ ।

चोरघ्नश्चतुरश्चारुश्चामीकरविभूषणः ॥ ३७ ॥

coraghnaścaturaścāruścāmīkaravibhūṣaṇaḥ ।। 37।।

चन्द्रार्ककोटिसदृशश्चन्द्रमौलितनूभवः ।

candrārkakoṭisadṛśaścandramaulitanūbhavaḥ ।

छादिताङ्गश्छद्महन्ता छेदिताखिलपातकः ॥ ३८ ॥

chāditāṅgaśchadmahantā cheditākhilapātakaḥ ।। 38।।

छेदीकृततमःक्लेशश्छत्रीकृतमहायशाः ।

chedīkṛtatamaḥkleśaśchatrīkṛtamahāyaśāḥ ।

छादिताशेषसंतापश्छरितामृतसागरः ॥ ३९ ॥

chāditāśeṣasantāpaścharitāmṛtasāgaraḥ ।। 39।।

छन्नत्रैगुण्यरूपश्च छातेहश्छिन्नसंशयः ।

channatraiguṇyarūpaśca chātehaśchinnasaṁśayaḥ ।

छन्दोमयश्छन्दगामी छिन्नपाशश्छविश्छदः ॥ ४० ॥

chandomayaśchandagāmī chinnapāśaśchaviśchadaḥ ।। 40।।

जगद्धितो जगत्पूज्यो जगज्ज्येष्ठो जगन्मयः ।

jagaddhito jagatpūjyo jagajjyeṣṭho jaganmayaḥ ।

जनको जाह्नवीसूनुर्जितामित्रो जगद्गुरुः ॥ ४१ ॥

janako jāhnavīsūnurjitāmitro jagadguruḥ ।। 41।।

जयी जितेन्द्रियो जैत्रो जरामरणवर्जितः ।

jayī jitendriyo jaitro jarāmaraṇavarjitaḥ ।

ज्योतिर्मयो जगन्नाथो जगज्जीवो जनाश्रयः ॥ ४२ ॥

jyotirmayo jagannātho jagajjīvo janāśrayaḥ ।। 42।।

जगत्सेव्यो जगत्कर्ता जगत्साक्षी जगत्प्रियः ।

jagatsevyo jagatkartā jagatsākṣī jagatpriyaḥ ।

जम्भारिवन्द्यो जयदो जगञ्जनमनोहरः ॥ ४३ ॥

jambhārivandyo jayado jagañjanamanoharaḥ ।। 43।।

जगदानन्दजनको जनजाड्यापहारकः ।

jagadānandajanako janajāḍyāpahārakaḥ ।

जपाकुसुमसंकाशो जनलोचनशोभनः ॥ ४४ ॥

japākusumasaṅkāśo janalocanaśobhanaḥ ।। 44।।

जनेश्वरो जितक्रोधो जनजन्मनिबर्हणः ।

janeśvaro jitakrodho janajanmanibarhaṇaḥ ।

जयदो जन्तुतापघ्नो जितदैत्यमहाव्रजः ॥ ४५ ॥

jayado jantutāpaghno jitadaityamahāvrajaḥ ।। 45।।

जितमायो जितक्रोधो जितसङ्गो जनप्रियः ।

jitamāyo jitakrodho jitasaṅgo janapriyaḥ ।

झंझानिलमहावेगो झरिताशेषपातकः ॥ ४६ ॥

jhañjhānilamahāvego jharitāśeṣapātakaḥ ।। 46।।

झर्झरीकृतदैत्यौघो झल्लरीवाद्यसंप्रियः ।

jharjharīkṛtadaityaugho jhallarīvādyasampriyaḥ ।

ज्ञानमूर्तिर्ज्ञानगम्यो ज्ञानी ज्ञानमहानिधिः ॥ ४७ ॥

jñānamūrtirjñānagamyo jñānī jñānamahānidhiḥ ।। 47।।

टंकारनृत्तविभवः टंकवज्रध्वजाङ्कितः ।

ṭaṅkāranṛttavibhavaḥ ṭaṅkavajradhvajāṅkitaḥ ।

टंकिताखिललोकश्च टंकितैनस्तमोरविः ॥ ४८ ॥

ṭaṅkitākhilalokaśca ṭaṅkitainastamoraviḥ ।। 48।।

डम्बरप्रभवो डम्भो डम्बो डमरुकप्रियः ।

ḍambaraprabhavo ḍambho ḍambo ḍamarukapriyaḥ ।

डमरोत्कटसन्नादो डिंभरूपस्वरूपकः ॥ ४९ ॥

ḍamarotkaṭasannādo ḍimbharūpasvarūpakaḥ ।। 49।।

ढक्कानादप्रीतिकरो ढालितासुरसंकुलः ।

ḍhakkānādaprītikaro ḍhālitāsurasaṅkulaḥ ।

ढौकितामरसंदोहो ढुण्डिविघ्नेश्वरानुजः ॥ ५० ॥

ḍhaukitāmarasandoho ḍhuṇḍivighneśvarānujaḥ ।। 50।।

तत्त्वज्ञस्तत्वगस्तीव्रस्तपोरूपस्तपोमयः ।

tattvajñastatvagastīvrastaporūpastapomayaḥ ।

त्रयीमयस्त्रिकालज्ञस्त्रिमूर्तिस्त्रिगुणात्मकः ॥ ५१ ॥

trayīmayastrikālajñastrimūrtistriguṇātmakaḥ ।। 51।।

त्रिदशेशस्तारकारिस्तापघ्नस्तापसप्रियः ।

tridaśeśastārakāristāpaghnastāpasapriyaḥ ।

तुष्टिदस्तुष्टिकृत्तीक्ष्णस्तपोरूपस्त्रिकालवित् ॥ ५२ ॥

tuṣṭidastuṣṭikṛttīkṣṇastaporūpastrikālavit ।। 52।।

स्तोता स्तव्यः स्तवप्रीतः स्तुतिः स्तोत्रं स्तुतिप्रियः ।

stotā stavyaḥ stavaprītaḥ stutiḥ stotraṁ stutipriyaḥ ।

स्थितः स्थायी स्थापकश्च स्थूलसूक्ष्मप्रदर्शकः ॥ ५३ ॥

sthitaḥ sthāyī sthāpakaśca sthūlasūkṣmapradarśakaḥ ।। 53।।

स्थविष्ठः स्थविरः स्थूलः स्थानदः स्थैर्यदः स्थिरः ।

sthaviṣṭhaḥ sthaviraḥ sthūlaḥ sthānadaḥ sthairyadaḥ sthiraḥ ।

दान्तो दयापरो दाता दुरितघ्नो दुरासदः ॥ ५४ ॥

dānto dayāparo dātā duritaghno durāsadaḥ ।। 54।।

दर्शनीयो दयासारो देवदेवो दयानिधिः ।

darśanīyo dayāsāro devadevo dayānidhiḥ ।

दुराधर्षो दुर्विगाह्यो दक्षो दर्पणशोभितः ॥ ५५ ॥

durādharṣo durvigāhyo dakṣo darpaṇaśobhitaḥ ।। 55।।

दुर्धरो दानशीलश्च द्वादशाक्षो द्विषड्भुजः ।

durdharo dānaśīlaśca dvādaśākṣo dviṣaḍbhujaḥ ।

द्विषट्कर्णो द्विषड्बाहुर्दीनसंतापनाशनः ॥ ५६ ॥

dviṣaṭkarṇo dviṣaḍbāhurdīnasantāpanāśanaḥ ।। 56।।

दन्दशूकेश्वरो देवो दिव्यो दिव्याकृतिर्दमः ।

dandaśūkeśvaro devo divyo divyākṛtirdamaḥ ।

दीर्घवृत्तो दीर्घबाहुर्दीर्घदृष्टिर्दिवस्पतिः ॥ ५७ ॥

dīrghavṛtto dīrghabāhurdīrghadṛṣṭirdivaspatiḥ ।। 57।।

दण्डो दमयिता दर्पो देवसिंहो दृढव्रतः ।

daṇḍo damayitā darpo devasiṁho dṛḍhavrataḥ ।

दुर्लभो दुर्गमो दीप्तो दुष्प्रेक्ष्यो दिव्यमण्डनः ॥ ५८ ॥

durlabho durgamo dīpto duṣprekṣyo divyamaṇḍanaḥ ।। 58।।

दुरोदरघ्नो दुःखघ्नो दुरारिघ्नो दिशांपतिः ।

durodaraghno duḥkhaghno durārighno diśāmpatiḥ ।

दुर्जयो देवसेनेशो दुर्ज्ञेयो दुरतिक्रमः ॥ ५९ ॥

durjayo devaseneśo durjñeyo duratikramaḥ ।। 59।।

दम्भो दृप्तश्च देवर्षिर्दैवज्ञो दैवचिन्तकः ।

dambho dṛptaśca devarṣirdaivajño daivacintakaḥ ।

धुरंधरो धर्मपरो धनदो धृतिवर्धनः ॥ ६० ॥

dhurandharo dharmaparo dhanado dhṛtivardhanaḥ ।। 60।।

धर्मेशो धर्मशास्त्रज्ञो धन्वी धर्मपरायणः ।

dharmeśo dharmaśāstrajño dhanvī dharmaparāyaṇaḥ ।

धनाध्यक्षो धनपतिर्धृतिमान्धूतकिल्बिषः ॥ ६१ ॥

dhanādhyakṣo dhanapatirdhṛtimāndhūtakilbiṣaḥ ।। 61।।

धर्महेतुर्धर्मशूरो धर्मकृद्धर्मविद् ध्रुवः ।

dharmaheturdharmaśūro dharmakṛddharmavid dhruvaḥ ।

धाता धीमान्धर्मचारी धन्यो धुर्यो धृतव्रतः ॥ ६२ ॥

dhātā dhīmāndharmacārī dhanyo dhuryo dhṛtavrataḥ ।। 62।।

नित्योत्सवो नित्यतृप्तो निर्लेपो निश्चलात्मकः ।

nityotsavo nityatṛpto nirlepo niścalātmakaḥ ।

निरवद्यो निराधारो निष्कलङ्को निरञ्जनः ॥ ६३ ॥

niravadyo nirādhāro niṣkalaṅko nirañjanaḥ ।। 63।।

निर्ममो निरहंकारो निर्मोहो निरुपद्रवः ।

nirmamo nirahaṅkāro nirmoho nirupadravaḥ ।

नित्यानन्दो निरातङ्को निष्प्रपञ्चो निरामयः ॥ ६४ ॥

nityānando nirātaṅko niṣprapañco nirāmayaḥ ।। 64।।

निरवद्यो निरीहश्च निर्दर्शो निर्मलात्मकः ।

niravadyo nirīhaśca nirdarśo nirmalātmakaḥ ।

नित्यानन्दो निर्जरेशो निःसङ्गो निगमस्तुतः ॥ ६५ ॥

nityānando nirjareśo niḥsaṅgo nigamastutaḥ ।। 65।।

निष्कण्टको निरालम्बो निष्प्रत्यूहो निरुद्भवः ।

niṣkaṇṭako nirālambo niṣpratyūho nirudbhavaḥ ।

नित्यो नियतकल्याणो निर्विकल्पो निराश्रयः ॥ ६६ ॥

nityo niyatakalyāṇo nirvikalpo nirāśrayaḥ ।। 66।।

नेता निधिर्नैकरूपो निराकारो नदीसुतः ।

netā nidhirnaikarūpo nirākāro nadīsutaḥ ।

पुलिन्दकन्यारमणः पुरुजित्परमप्रियः ॥ ६७ ॥

pulindakanyāramaṇaḥ purujitparamapriyaḥ ।। 67।।

प्रत्यक्षमूर्तिः प्रत्यक्षः परेशः पूर्णपुण्यदः ।

pratyakṣamūrtiḥ pratyakṣaḥ pareśaḥ pūrṇapuṇyadaḥ ।

पुण्याकरः पुण्यरूपः पुण्यः पुण्यपरायणः ॥ ६८ ॥

puṇyākaraḥ puṇyarūpaḥ puṇyaḥ puṇyaparāyaṇaḥ ।। 68।।

पुण्योदयः परं ज्योतिः पुण्यकृत्पुण्यवर्धनः ।

puṇyodayaḥ paraṁ jyotiḥ puṇyakṛtpuṇyavardhanaḥ ।

परानन्दः परतरः पुण्यकीर्तिः पुरातनः ॥ ६९ ॥

parānandaḥ parataraḥ puṇyakīrtiḥ purātanaḥ ।। 69।।

प्रसन्नरूपः प्राणेशः पन्नगः पापनाशनः ।

prasannarūpaḥ prāṇeśaḥ pannagaḥ pāpanāśanaḥ ।

प्रणतार्तिहरः पूर्णः पार्वतीनन्दनः प्रभुः ॥ ७० ॥

praṇatārtiharaḥ pūrṇaḥ pārvatīnandanaḥ prabhuḥ ।। 70।।

पूतात्मा पुरुषः प्राणः प्रभवः पुरुषोत्तमः ।

pūtātmā puruṣaḥ prāṇaḥ prabhavaḥ puruṣottamaḥ ।

प्रसन्नः परमस्पष्टः परः परिवृढः परः ॥ ७१ ॥

prasannaḥ paramaspaṣṭaḥ paraḥ parivṛḍhaḥ paraḥ ।। 71।।

परमात्मा परब्रह्म परार्थः प्रियदर्शनः ।

paramātmā parabrahma parārthaḥ priyadarśanaḥ ।

पवित्रः पुष्टिदः पूर्तिः पिङ्गलः पुष्टिवर्धनः ॥ ७२ ॥

pavitraḥ puṣṭidaḥ pūrtiḥ piṅgalaḥ puṣṭivardhanaḥ ।। 72।।

पापहारी पाशधरः प्रमत्तासुरशिक्षकः ।

pāpahārī pāśadharaḥ pramattāsuraśikṣakaḥ ।

पावनः पावकः पूज्यः पूर्णानन्दः परात्परः ॥ ७३ ॥

pāvanaḥ pāvakaḥ pūjyaḥ pūrṇānandaḥ parātparaḥ ।। 73।।

पुष्कलः प्रवरः पूर्वः पितृभक्तः पुरोगमः ।

puṣkalaḥ pravaraḥ pūrvaḥ pitṛbhaktaḥ purogamaḥ ।

प्राणदः प्राणिजनकः प्रदिष्टः पावकोद्भवः ॥ ७४ ॥

prāṇadaḥ prāṇijanakaḥ pradiṣṭaḥ pāvakodbhavaḥ ।। 74।।

परब्रह्मस्वरूपश्च परमैश्वर्यकारणम् ।

parabrahmasvarūpaśca paramaiśvaryakāraṇam ।

परर्द्धिदः पुष्टिकरः प्रकाशात्मा प्रतापवान् ॥ ७५ ॥

pararddhidaḥ puṣṭikaraḥ prakāśātmā pratāpavān ।। 75।।

प्रज्ञापरः प्रकृष्टार्थः पृथुः पृथुपराक्रमः ।

prajñāparaḥ prakṛṣṭārthaḥ pṛthuḥ pṛthuparākramaḥ ।

फणीश्वरः फणिवरः फणामणिविभूषणः ॥ ७६ ॥

phaṇīśvaraḥ phaṇivaraḥ phaṇāmaṇivibhūṣaṇaḥ ।। 76।।

फलदः फलहस्तश्च फुल्लाम्बुजविलोचनः ।

phaladaḥ phalahastaśca phullāmbujavilocanaḥ ।

फडुच्चाटितपापौघः फणिलोकविभूषणः ॥ ७७ ॥

phaḍuccāṭitapāpaughaḥ phaṇilokavibhūṣaṇaḥ ।। 77।।

बाहुलेयो बृहद्रूपो बलिष्ठो बलवान् बली ।

bāhuleyo bṛhadrūpo baliṣṭho balavān balī ।

ब्रह्मेशविष्णुरूपश्च बुद्धो बुद्धिमतां वरः ॥ ७८ ॥

brahmeśaviṣṇurūpaśca buddho buddhimatāṁ varaḥ ।। 78।।

बालरूपो ब्रह्मगर्भो ब्रह्मचारी बुधप्रियः ।

bālarūpo brahmagarbho brahmacārī budhapriyaḥ ।

बहुश्रुतो बहुमतो ब्रह्मण्यो ब्राह्मणप्रियः ॥ ७९ ॥

bahuśruto bahumato brahmaṇyo brāhmaṇapriyaḥ ।। 79।।

बलप्रमथनो ब्रह्मा बहुरूपो बहुप्रदः ।

balapramathano brahmā bahurūpo bahupradaḥ ।

बृहद्भानुतनूद्भूतो बृहत्सेनो बिलेशयः ॥ ८० ॥

bṛhadbhānutanūdbhūto bṛhatseno bileśayaḥ ।। 80।।

बहुबाहुर्बलश्रीमान् बहुदैत्यविनाशकः ।

bahubāhurbalaśrīmān bahudaityavināśakaḥ ।

बिलद्वारान्तरालस्थो बृहच्छक्तिधनुर्धरः ॥ ८१ ॥

biladvārāntarālastho bṛhacchaktidhanurdharaḥ ।। 81।।

बालार्कद्युतिमान् बालो बृहद्वक्षा बृहद्धनुः ।

bālārkadyutimān bālo bṛhadvakṣā bṛhaddhanuḥ ।

भव्यो भोगीश्वरो भाव्यो भवनाशो भवप्रियः ॥ ८२ ॥

bhavyo bhogīśvaro bhāvyo bhavanāśo bhavapriyaḥ ।। 82।।

भक्तिगम्यो भयहरो भावज्ञो भक्तसुप्रियः ।

bhaktigamyo bhayaharo bhāvajño bhaktasupriyaḥ ।

भुक्तिमुक्तिप्रदो भोगी भगवान् भाग्यवर्धनः ॥ ८३ ॥

bhuktimuktiprado bhogī bhagavān bhāgyavardhanaḥ ।। 83।।

भ्राजिष्णुर्भावनो भर्ता भीमो भीमपराक्रमः ।

bhrājiṣṇurbhāvano bhartā bhīmo bhīmaparākramaḥ ।

भूतिदो भूतिकृद्भोक्ता भूतात्मा भुवनेश्वरः ॥ ८४ ॥

bhūtido bhūtikṛdbhoktā bhūtātmā bhuvaneśvaraḥ ।। 84।।

भावको भीकरो भीष्मो भावकेष्टो भवोद्भवः ।

bhāvako bhīkaro bhīṣmo bhāvakeṣṭo bhavodbhavaḥ ।

भवतापप्रशमनो भोगवान् भूतभावनः ॥ ८५ ॥

bhavatāpapraśamano bhogavān bhūtabhāvanaḥ ।। 85।।

भोज्यप्रदो भ्रान्तिनाशो भानुमान् भुवनाश्रयः ।

bhojyaprado bhrāntināśo bhānumān bhuvanāśrayaḥ ।

भूरिभोगप्रदो भद्रो भजनीयो भिषग्वरः ॥ ८६ ॥

bhūribhoogaprado bhadro bhajanīyo bhiṣagvaraḥ ।। 86।।

महासेनो महोदारो महाशक्तिर्महाद्युतिः ।

mahāseno mahodāro mahāśaktirmahādyutiḥ ।

महाबुद्धिर्महावीर्यो महोत्साहो महाबलः ॥ ८७ ॥

mahābuddhirmahāvīryo mahotsāho mahābalaḥ ।। 87।।

महाभोगी महामायी मेधावी मेखली महान् ।

mahābhogī mahāmāyī medhāvī mekhalī mahān ।

मुनिस्तुतो महामान्यो महानन्दो महायशाः ॥ ८८ ॥

munistuto mahāmānyo mahānando mahāyaśāḥ ।। 88।।

महोर्जितो माननिधिर्मनोरथफलप्रदः ।

mahorjito mānanidhirmanorathaphalapradaḥ ।

महोदयो महापुण्यो महाबलपराक्रमः ॥ ८९ ॥

mahodayo mahāpuṇyo mahābalaparākramaḥ ।। 89।।

मानदो मतिदो माली मुक्तामालाविभूषणः ।

mānado matido mālī muktāmālāvibhūṣaṇaḥ ।

मनोहरो महामुख्यो महर्द्धिर्मूर्तिमान्मुनिः ॥ ९० ॥

manoharo mahāmukhyo maharddhirmūrtimānmuniḥ ।। 90।।

महोत्तमो महोपायो मोक्षदो मङ्गलप्रदः ।

mahottamo mahopāyo mokṣado maṅgalapradaḥ ।

मुदाकरो मुक्तिदाता महाभोगो महोरगः ॥ ९१ ॥

mudākaro muktidātā mahābhogo mahoragaḥ ।। 91।।

यशस्करो योगयोनिर्योगिष्ठो यमिनां वरः ।

yaśaskaro yogayoniryogiṣṭho yamināṁ varaḥ ।

यशस्वी योगपुरुषो योग्यो योगनिधिर्यमी ॥ ९२ ॥

yaśasvī yogapuruṣo yogyo yoganidhiryamī ।। 92।।

यतिसेव्यो योगयुक्तो योगविद्योगसिद्धिदः ।

yatisevyo yogayukto yogavidyogasiddhidaḥ ।

यन्त्रो यन्त्री च यन्त्रज्ञो यन्त्रवान्यन्त्रवाहकः ॥ ९३ ॥

yantro yantrī ca yantrajño yantravānyantravāhakaḥ ।। 93।।

यातनारहितो योगी योगीशो योगिनां वरः ।

yātanārahito yogī yogīśo yogināṁ varaḥ ।

रमणीयो रम्यरूपो रसज्ञो रसभावनः ॥ ९४ ॥

ramaṇīyo ramyarūpo rasajño rasabhāvanaḥ ।। 94।।

रञ्जनो रञ्जितो रागी रुचिरो रुद्रसंभवः ।

rañjano rañjito rāgī ruciro rudrasambhavaḥ ।

रणप्रियो रणोदारो रागद्वेषविनाशनः ॥ ९५ ॥

raṇapriyo raṇodāro rāgadveṣavināśanaḥ ।। 95।।

रत्नार्ची रुचिरो रम्यो रूपलावण्यविग्रहः ।

ratnārcī ruciro ramyo rūpalāvaṇyavigrahaḥ ।

रत्नाङ्गदधरो रत्नभूषणो रमणीयकः ॥ ९६ ॥

ratnāṅgadadharo ratnabhūṣaṇo ramaṇīyakaḥ ।। 96।।

रुचिकृद्रोचमानश्च रञ्जितो रोगनाशनः ।

rucikṛdrocamānaśca rañjito roganāśanaḥ ।

राजीवाक्षो राजराजो रक्तमाल्यानुलेपनः ॥ ९७ ॥

rājīvākṣo rājarājo raktamālyānulepanaḥ ।। 97।।

राजद्वेदागमस्तुत्यो रजःसत्त्वगुणान्वितः ।

rājadvedāgamastutyo rajaḥsattvaguṇānvitaḥ ।

रजनीशकलारम्यो रत्नकुण्डलमण्डितः ॥ ९८ ॥

rajanīśakalāramyo ratnakuṇḍalamaṇḍitaḥ ।। 98।।

रत्नसन्मौलिशोभाढ्यो रणन्मञ्जीरभूषणः ।

ratnasanmauliśobhāḍhyo raṇanmañjīrabhūṣaṇaḥ ।

लोकैकनाथो लोकेशो ललितो लोकनायकः ॥ ९९ ॥

lokaikanātho lokeśo lalito lokanāyakaḥ ।। 99।।

लोकरक्षो लोकशिक्षो लोकलोचनरञ्जितः ।

lokarakṣo lokaśikṣo lokalocanarañjitaḥ ।

लोकबन्धुर्लोकधाता लोकत्रयमहाहितः ॥ १०० ॥

lokabandhurlokadhātā lokatrayamahāhitaḥ ।। 100।।

लोकचूडामणिर्लोकवन्द्यो लावण्यविग्रहः ।

lokacūḍāmaṇirlokavandyo lāvaṇyavigrahaḥ ।

लोकाध्यक्षस्तु लीलावान्लोकोत्तरगुणान्वितः ॥ १०१ ॥

lokādhyakṣastu līlāvānlokottaraguṇānvitaḥ ।। 101।।

वरिष्ठो वरदो वैद्यो विशिष्टो विक्रमो विभुः ।

variṣṭho varado vaidyo viśiṣṭo vikramo vibhuḥ ।

विबुधाग्रचरो वश्यो विकल्पपरिवर्जितः ॥ १०२ ॥

vibudhāgracaro vaśyo vikalpaparivarjitaḥ ।। 102।।

विपाशो विगतातङ्को विचित्राङ्गो विरोचनः ।

vipāśo vigatātaṅko vicitrāṅgo virocanaḥ ।

विद्याधरो विशुद्धात्मा वेदाङ्गो विबुधप्रियः ॥ १०३ ॥

vidyādharo viśuddhātmā vedāṅgo vibudhapriyaḥ ।। 103।।

वचस्करो व्यापकश्च विज्ञानी विनयान्वितः ।

vacaskaro vyāpakaśca vijñānī vinayānvitaḥ ।

विद्वत्तमो विरोधिघ्नो वीरो विगतरागवान् ॥ १०४ ॥

vidvattamo virodhighno vīro vigatarāgavān ।। 104।।

वीतभावो विनीतात्मा वेदगर्भो वसुप्रदः ।

vītabhāvo vinītātmā vedagarbho vasupradaḥ ।

विश्वदीप्तिर्विशालाक्षो विजितात्मा विभावनः ॥ १०५ ॥

viśvadīptirviśālākṣo vijitātmā vibhāvanaḥ ।। 105।।

वेदवेद्यो विधेयात्मा वीतदोषश्च वेदवित् ।

vedavedyo vidheyātmā vītadoṣaśca vedavit ।

विश्वकर्मा वीतभयो वागीशो वासवार्चितः ॥ १०६ ॥

viśvakarmā vītabhayo vāgīśo vāsavārcitaḥ ।। 106।।

वीरध्वंसो विश्वमूर्तिर्विश्वरूपो वरासनः ।

vīradhvaṁso viśvamūrtirviśvarūpo varāsanaḥ ।

विशाखो विमलो वाग्मी विद्वान्वेदधरो वटुः ॥ १०७ ॥

viśākho vimalo vāgmī vidvānvedadharo vaṭuḥ ।। 107।।

वीरचूडामणिर्वीरो विद्येशो विबुधाश्रयः ।

vīracūḍāmaṇirvīro vidyeśo vibudhāśrayaḥ ।

विजयी विनयी वेत्ता वरीयान्विरजा वसुः ॥ १०८ ॥

vijayī vinayī vettā varīyānvirajā vasuḥ ।। 108।।

वीरघ्नो विज्वरो वेद्यो वेगवान्वीर्यवान्वशी ।

vīraghno vijvaro vedyo vegavānvīryavānvaśī ।

वरशीलो वरगुणो विशोको वज्रधारकः ॥ १०९ ॥

varaśīlo varaguṇo viśoko vajradhārakaḥ ।। 109।।

शरजन्मा शक्तिधरः शत्रुघ्नः शिखिवाहनः ।

śarajanmā śaktidharaḥ śatrughnaḥ śikhivāhanaḥ ।

श्रीमान्शिष्टः शुचिः शुद्धः शाश्वतो श्रुतिसागरः ॥ ११० ॥

śrīmānśiṣṭaḥ śuciḥ śuddhaḥ śāśvato śrutisāgaraḥ ।। 110।।

शरण्यः शुभदः शर्म शिष्टेष्टः शुभलक्षणः ।

śaraṇyaḥ śubhadaḥ śarma śiṣṭeṣṭaḥ śubhalakṣaṇaḥ ।

शान्तः शूलधरः श्रेष्ठः शुद्धात्मा शङ्करः शिवः ॥ १११ ॥

śāntaḥ śūladharaḥ śreṣṭhaḥ śuddhātmā śaṅkaraḥ śivaḥ ।। 111।।

शितिकण्ठात्मजः शूरः शान्तिदः शोकनाशनः ।

śitikaṇṭhātmajaḥ śūraḥ śāntidaḥ śokanāśanaḥ ।

षाण्मातुरः षण्मुखश्च षड्गुणैश्वर्यसंयुतः ॥ ११२ ॥

ṣāṇmāturaḥ ṣaṇmukhaśca ṣaḍguṇaiśvaryasaṁyutaḥ ।। 112।।

षट्चक्रस्थः षडूर्मिघ्नः षडङ्गश्रुतिपारगः ।

ṣaṭcakrasthaḥ ṣaḍūrmighnaḥ ṣaḍaṅgaśrutipāragaḥ ।

षड्भावरहितः षट्कः षट्शास्त्रस्मृतिपारगः ॥ ११३ ॥

ṣaḍbhāvarahitaḥ ṣaṭkaḥ ṣaṭśāstrasmṛtipāragaḥ ।। 113।।

षड्वर्गदाता षड्ग्रीवः षडरिघ्नः षडाश्रयः ।

ṣaḍvargadātā ṣaḍgrīvaḥ ṣaḍarighnaḥ ṣaḍāśrayaḥ ।

षट्किरीटधरः श्रीमान् षडाधारश्च षट्क्रमः ॥ ११४ ॥

ṣaṭkirīṭadharaḥ śrīmān ṣaḍādhāraśca ṣaṭkramaḥ ।। 114।।

षट्कोणमध्यनिलयः षण्डत्वपरिहारकः ।

ṣaṭkoṇamadhyanilayaḥ ṣaṇḍatvaparihārakaḥ ।

सेनानीः सुभगः स्कन्दः सुरानन्दः सतां गतिः ॥ ११५ ॥

senānīḥ subhagaḥ skandaḥ surānandaḥ satāṁ gatiḥ ।। 115।।

सुब्रह्मण्यः सुराध्यक्षः सर्वज्ञः सर्वदः सुखी ।

subrahmaṇyaḥ surādhyakṣaḥ sarvajñaḥ sarvadaḥ sukhī ।

सुलभः सिद्धिदः सौम्यः सिद्धेशः सिद्धिसाधनः ॥ ११६ ॥

sulabhaḥ siddhidaḥ saumyaḥ siddheśaḥ siddhisādhanaḥ ।। 116।।

सिद्धार्थः सिद्धसंकल्पः सिद्धसाधुः सुरेश्वरः ।

siddhārthaḥ siddhasaṅkalpaḥ siddhasādhuḥ sureśvaraḥ ।

सुभुजः सर्वदृक्साक्षी सुप्रसादः सनातनः ॥ ११७ ॥

subhujaḥ sarvadṛksākṣī suprasādaḥ sanātanaḥ ।। 117।।

सुधापतिः स्वयंज्योतिः स्वयंभूः सर्वतोमुखः ।

sudhāpatiḥ svayañjyotiḥ svayambhūḥ sarvatomukhaḥ ।

समर्थः सत्कृतिः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥ ११८ ॥

samarthaḥ satkṛtiḥ sūkṣmaḥ sughoṣaḥ sukhadaḥ suhṛt ।। 118।।

सुप्रसन्नः सुरश्रेष्ठः सुशीलः सत्यसाधकः ।

suprasannaḥ suraśreṣṭhaḥ suśīlaḥ satyasādhakaḥ ।

संभाव्यः सुमनाः सेव्यः सकलागमपारगः ॥ ११९ ॥

sambhāvyaḥ sumanāḥ sevyaḥ sakalāgamapāragaḥ ।। 119।।

सुव्यक्तः सच्चिदानन्दः सुवीरः सुजनाश्रयः ।

suvyaktaḥ saccidānandaḥ suvīraḥ sujanāśrayaḥ ।

सर्वलक्षणसंपन्नः सत्यधर्मपरायणः ॥ १२० ॥

sarvalakṣaṇasampannaḥ satyadharmaparāyaṇaḥ ।। 120।।

सर्वदेवमयः सत्यः सदा मृष्टान्नदायकः ।

sarvadevamayaḥ satyaḥ sadā mṛṣṭānnadāyakaḥ ।

सुधापी सुमतिः सत्यः सर्वविघ्नविनाशनः ॥ १२१ ॥

sudhāpī sumatiḥ satyaḥ sarvavighnavināśanaḥ ।। 121।।

सर्वदुःखप्रशमनः सुकुमारः सुलोचनः ।

sarvaduḥkhapraśamanaḥ sukumāraḥ sulocanaḥ ।

सुग्रीवः सुधृतिः सारः सुराराध्यः सुविक्रमः ॥ १२२ ॥

sugrīvaḥ sudhṛtiḥ sāraḥ surārādhyaḥ suvikramaḥ ।। 122।।

सुरारिघ्नः स्वर्णवर्णः सर्पराजः सदा शुचिः ।

surārighnaḥ svarṇavarṇaḥ sarparājaḥ sadā śuciḥ ।

सप्तार्चिर्भूः सुरवरः सर्वायुधविशारदः ॥ १२३ ॥

saptārcirbhūḥ suravaraḥ sarvāyudhaviśāradaḥ ।। 123।।

हस्तिचर्माम्बरसुतो हस्तिवाहनसेवितः ।

hasticarmāmbarasuto hastivāhanasevitaḥ ।

हस्तचित्रायुधधरो हृताघो हसितानन: ॥ १२४ ॥

hastacitrāyudhadharo hṛtāgho hasitānanaḥ ।। 124।।

हेमभूषो हरिद्वर्णो हृष्टिदो हृष्टिवर्धनः ।

hemabhūṣo haridvarṇo hṛṣṭido hṛṣṭivardhanaḥ ।

हेमाद्रिभिद्धंसरूपो हुंकारहतकिल्बिषः ॥ १२५ ॥

hemādribhiddhaṁsarūpo huṅkārahatakilbiṣaḥ ।। 125।।

हिमाद्रिजातातनुजो हरिकेशो हिरण्मयः ।

himādrijātātanujo harikeśo hiraṇmayaḥ ।

हृद्यो हृष्टो हरिसखो हंसो हंसगतिर्हविः ॥ १२६ ॥

hṛdyo hṛṣṭo harisakho haṁso haṁsagatirhaviḥ ।। 126।।

हिरण्यवर्णो हितकृद्धर्षदो हेमभूषणः ।

hiraṇyavarṇo hitakṛddharṣado hemabhūṣaṇaḥ ।

हरप्रियो हितकरो हतपापो हरोद्भवः ॥ १२७ ॥

harapriyo hitakaro hatapāpo harodbhavaḥ ।। 127।।

क्षेमदः क्षेमकृत्क्षेम्यः क्षेत्रज्ञः क्षामवर्जितः ।

kṣemadaḥ kṣemakṛtkṣemyaḥ kṣetrajñaḥ kṣāmavarjitaḥ ।

क्षेत्रपालः क्षमाधारः क्षेमक्षेत्रः क्षमाकरः ॥ १२८ ॥

kṣetrapālaḥ kṣamādhāraḥ kṣemakṣetraḥ kṣamākaraḥ ।। 128।।

क्षुद्रघ्नः क्षान्तिदः क्षेमः क्षितिभूषः क्षमाश्रयः ।

kṣudraghnaḥ kṣāntidaḥ kṣemaḥ kṣitibhūṣaḥ kṣamāśrayaḥ ।

क्षालिताघः क्षितिधरः क्षीणसंरक्षणक्षमः ॥ १२९ ॥

kṣālitāghaḥ kṣitidharaḥ kṣīṇasaṁrakṣaṇakṣamaḥ ।। 129।।

क्षणभङ्गुरसन्नद्धघनशोभिकपर्दकः ।

kṣaṇabhaṅgurasannaddhaghanaśobhikapardakaḥ ।

क्षितिभृन्नाथतनयामुखपङ्कजभास्करः ॥ १३० ॥

kṣitibhṛnnāthatanayāmukhapaṅkajabhāskaraḥ ।। 130।।

क्षताहितः क्षरः क्षन्ता क्षतदोषः क्षमानिधिः ।

kṣatāhitaḥ kṣaraḥ kṣantā kṣatadoṣaḥ kṣamānidhiḥ ।

क्षपिताखिलसंतापः क्षपानाथसमाननः ॥ १३१ ॥

kṣapitākhilasantāpaḥ kṣapānāthasamānanaḥ ।। 131।।

इति नाम्नां सहस्राणि षण्मुखस्य च नारद ।

iti nāmnāṁ sahasrāṇi ṣaṇmukhasya ca nārada ।

यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा ॥ १ ॥

yaḥ paṭhecchṛṇuyādvāpi bhaktiyuktena cetasā ।। 1।।

स सद्यो मुच्यते पापैर्मनोवाक्कायसंभवैः ।

sa sadyo mucyate pāpairmanovākkāyasambhavaiḥ ।

आयुर्वृद्धिकरं पुंसां स्थैर्यवीर्यविवर्धनम् ॥ २ ॥

āyurvṛddhikaraṁ puṁsāṁ sthairyavīryavivardhanam ।। 2।।

वाक्येनैकेन वक्ष्यामि वाञ्छितार्थं प्रयच्छति ।

vākyenaikena vakṣyāmi vāñchitārtha prayacchati ।

तस्मात्सर्वात्मना ब्रह्मन्नियमेन जपेत्सुधीः ॥ ३ ॥

tasmātsarvātmanā brahmanniyamena japetsudhīḥ ।। 3।।

॥ इति श्रीस्कान्दे महापुराणे

।। iti śrīskānde mahāpurāṇe

ईश्वरप्रोक्ते ब्रह्मनारदसंवादे

īśvaraprokte brahmanāradasaṁvāde

षण्मुखसहस्रनामस्तोत्रं संपूर्णम् ॥

ṣaṇmukhasahasranāmastotraṁ sampūrṇam ।।